Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः-४७ सञ्चिका -६८ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजशुक्ल प्रतिपदादि षष्ठ्यां ज्येष्ठानक्षत्रयुक्त शुक्रवासरः ०७ अक्टोबर २०१६ मूल्यम्: ₹ १.२५


## सुभाषितम्

दाता दानस्यान्तरा स्यात्पृथिव्यां
गेहे गेहे याचकानां समूहः ।
चिन्तारत्नस्यास्ति सत्वे विवादो
मार्गे मार्गे रेणवः सन्त्यसंख्याः ॥

## श्रीवेदान्तदेशिकस्य हयग्रीवस्तुतिः

चतुर्दशे शतके भुमिमिनां स्वजनुषा पवित्रीकृतवन्तो वेदान्तदेशिकाः हयग्रीवमन्त्रोपासनया वाक्सिद्धिं प्रापुरिति भक्तानां विश्वासः। खण्डनखण्डखाद्यकारः श्री हर्षोऽपि मन्त्रबलेनैव नैषधाख्यं महाकाव्यं निबबन्धेति ज्ञायते। यदाह –

**तच्चिन्तामणिमन्त्रचिन्तनफले नव्ये महा–**
**काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्वलः ॥**

इति। हयग्रीवो वागधिदेवता। श्री देशिकैरेव हयग्रीवस्तुत्यन्ते प्रोक्तं खलु–

**व्याख्यामुद्रां करसरसिजैः पुस्तकं शङ्खचक्रे**
**बिभ्रद्भिन्नस्फटिकरुचिरे पुण्डरीके निषण्णः।**
**अम्लानश्रीरमृतविशदैरंशुभिः प्लावयन्माम्**
**आविर्भूयादनघमहिमा मानसे वागधीशः॥** इति ।

फलश्रुतौ चैतत्स्तोत्रपठनस्य वागर्थसिद्धिरेव फलम् इति प्रोक्तम्। ''वागर्थसिद्धिहेतोः पठत हयग्रीवसंस्तुतिं भक्त्या'' इति। ये जना हयग्रीवानुग्रहभाजस्ते वाग्मिनो भविष्यन्तीति चान्यस्मिन् पद्ये स्पष्टं व्याहृतम्।

**अपि क्षणार्धं कलयन्ति ये त्वाम् आप्लावयन्तं विशदैर्मयूखैः।**
**वाचां प्रवाहैरनिवारितैस्ते मन्दाकिनीं मन्दयितुं क्षमन्ते ॥** इति ।

हयग्रीवस्तोत्रपठनेन विद्वद्गोष्ठीषु जयो लभ्यत इति ज्ञायते। तदेवाशंसितं श्रीमद्देशिकैः पद्यद्वये । यथा–

**विशेषवित्पारिषदेषु नाथ विदग्धगोष्ठीसमराङ्गणेषु।**
**जिगीषतो मे कवितार्किकेन्द्रान् जिह्वाग्रसिंहासनमभ्युपेयाः॥**
**त्वां चिन्तयन् त्वन्मयतां प्रपन्नस्त्वामुद्गृणन् शब्दमयेन धाम्ना।**
**स्वामिन् समाजेषु समेधिषीय स्वच्छन्दवादाहवबद्धशूरः॥** इति।

अतः सर्वैरपि कवित्वप्रेप्सुभिवाग्मित्वप्रेप्सुभिश्च हयग्रीवस्तुतिरभीक्ष्णं पठनीया इति ब्रूमः।

## पतञ्जलिसंस्थायाः उत्पादनाघटकानामारम्भः

हरिद्वारम्–पतञ्जलि–आयुर्वेदौष–धानां तथा आहारपदार्थानाम् उत्पादनाय देशस्य विविधभागेषु षट् उत्पादनाघटकाः स्थाप्यन्ते इति संस्थायाः प्रवर्तकः योगगुरुः रामदेवः अब्रवीत्। ''हरिद्वारे अधुना उत्पादनाघटकं वर्तते। परं तेन पर्याप्तताः नास्ति। ग्राहकानाम् अपेक्षानुसारेण अत्र उत्पादनं कर्तुं नैव शक्यते। अतः त्रिसहस्रकोटितः पञ्चसहस्रकोटिपर्यन्तं धनव्ययं कृत्वा गुवाहट्यां जम्मुनगरे इन्दोर्नगरे आन्ध्र–महाराष्ट्र–उत्तरप्रदेशे च उत्पादनाघटकाः आरभ्यन्ते। पश्चिम बङ्गाले तन्डुलतुषकणसंस्करणस्य तथैव तण्डुलोत्पन्नानां उत्पादाघटकः आरभ्यते। प्रसक्तवत्सरे दशसहस्र–कोटिरूप्यकाणां वाणिज्य–व्यवहाराय निर्णयः स्वीकृतः। अग्रे पञ्चाशतसहस्रकोटिरूप्यकाणामपि व्यवहाराय प्रयत्नः करिष्यते'' इति रामदेवः अब्रवीत्। स्वदेशिवस्तु–प्रोत्साहनाय गुरुणा क्रियमाणः अयं श्लाघनीयकर्मविशेषः सर्वजनमान्यः वर्तते।

## तुलासङ्क्रमणे कावेरीतीर्थोद्भवः

मडिकेरी–अष्टादश तम दिनाङ्के सायं तुलासङ्क्रमणय भवति। सूर्यः तद्दिने तुलाराशिं प्रविशति। कर्णाटकराज्यस्य कोडग मण्डलस्य मडिकेरीसमीपस्थे भागमण्डले सायं ६.०७ घण्टायां कावेरीनदी तीर्थोद्भवः भवति। मीनलग्ने तीर्थोद्भवमूहूर्तो वर्तते। तीर्थोद्भवं निमित्तीकृत्य तलकावेरी भागमण्डलयोः देवालयेषु नानाविध धार्मिककार्याणिसमारब्धानि।

## वैद्यकीयोपकरणोत्पादनागारस्य स्थापनम्

नवदिल्ली–अत्याधुनिकवैद्यकीयोप–करणानां निर्माणस्य मेड्पार्क–नामकसंस्था केन्द्रसर्वकारतः आरभ्यते। एतदर्थं सम्पुटे सदस्यानाम् अनुमोदनमपि प्राप्तमस्ति। चेन्नैनगरे विशालभूमिः चितास्ति । सा भूमिः अधुना सर्वकारायत्तायाः हेच्.एल्.एल्. लैफकेरसंस्थायाः स्वाम्ये वर्तते। सा संस्था भूमिं प्रदातुम् अङ्गीकृतवती। भोग्यरूपेण सा भूमिं प्रदास्यति। चेनै नगरस्य समीपे चेङ्गलपट्नामके प्रदेशे भूमिः वर्तते। ''भारतस्य वैद्यकीयोपकरणोत्पादनक्षेत्रे – इदम्प्रथम तया एतादृशः प्रयत्नः क्रियमाणः वर्तते। अत्याधुनिकोपकरणानि न्यूनधन–व्ययेन स्थलीयरीत्या उत्पादनीयानि। अतः मेड्पार्क अत्र स्थाप्यते। एवमेव जनाः अपि मितव्ययेन चिकित्साम् औषधानि च प्राप्तुम् अर्हन्ति'' इति सर्वकारस्य प्रकटने सूचितमस्ति। 'भारतदेशे वैद्यकीयोपकरणनिर्माणक्षेत्रम् अधुनापि शैशवावस्थायामेवास्ति। मेड्पार्क–स्थापनेन वैद्यकीयोपकरणतन्त्रक्षेत्रम् अभिवर्धते। तत्सम्बद्धक्षेत्रेषु उद्योगाः अपि सृज्यते। 'भारते उत्पादयन्तु' इति अभियानस्य उत्तेजनमपि भवति इति सर्वकारः अवोचत्।

## क्यूरियासिटिनौका नवीनस्थलमन्विष्यति

वाषिङ्टन्–मङ्गलग्रहस्य अध्ययनाय अन्तारष्ट्रियबाह्याकाश संस्थया प्रेषिता अन्तरिक्षनौका एव क्यूरिया सिटिः । अधुना सा नौका मङ्गलाङ्गणे नूतनस्थलस्य शोधे निरता वर्तते। मङ्गलग्रहस्य प्राचीनजलयुववातावरणस्य तथैव तत्र पूर्वम् उषितानां जीविनाम् अध्ययनाय नौका उन्नतप्रदेशं प्रति प्रयाणम् आरब्धवती। अधुना नूतन प्रदेशः किलोमीट्रद्वयपरिमितदूरे अस्ति। सः प्रदेशः खनिजांशैः पूर्णः वर्तते। ईषदुन्नते अस्मिन् प्रदेशे अयसः हेमटैट्लोहकस्य च अंशाः भूयांसः सन्ति। एवमेव मृदंशयुता शिलाप्यस्ति । अस्य प्रदेशस्य अध्ययनं कृत्वा जीववासस्य अध्ययनं करिष्यति। एतावता नौका अशीतुत्तरैकलक्षं चित्राणि भूमिं प्रति प्रेषितवती ।

## त्रिभ्यः विज्ञानिभ्यः भौतशास्त्रस्य नोबेल्प्रशस्तिः

स्टाक्होम्–विलक्षणद्रव्याणाम् अन्वेषणकार्यं पुरस्कृत्य त्रिभ्यः ब्रिटिषदेशस्य विज्ञानिभ्यः भौतशास्त्र क्षेत्रस्य नोबेल्प्रशस्तिः घोषिता वर्तते। द्व्यशीतिवर्षवयाः डेविड्थेलेसः पञ्चषष्टिवर्षीयः डङ्कन्हाल्डेनः तथैव चतुस्सप्तति–वर्षवयाः मैकेलकास्टर्लिड्जश्च नोबेल्प्रशस्तिं स्वीकरिष्यन्ति। त्रयः अपि मिलित्वा प्रशस्तिं लभन्ते। प्रशस्त्या सह त्रयोविंशत्युत्तरषड्शत रूप्यकाणि दीयन्ते । तस्मिन् धने अर्धभागः डेविड्थेलेसाय दीयते। अवशिष्टार्धभागं इतरौ द्वौ समतया विभज्य स्वीकरिष्यन्ति । कृषीभूतानाम् अयस्कान्तीयस्तराणां गुणानाम् अध्ययनं कर्तुं एते गणित सूत्रेणम् उपयोगम् अकार्षुः। एतेषां संशोधनं घनीकृतद्रव्याणां अथवा घनीकृतपदार्थानां गुणलक्षणानाम् अध्ययनाय सहकरोति। एतादृश–पदार्थान् अग्रे बहुषुक्षेत्रेषु उपयोक्तुं शक्नुमः इति रायल्स्वीड्न्प्रतिष्ठानम् अवोचत्। किञ्चन वस्तु अथवा द्रव्यं अल्पीयसि तापे अतिवाहकत्वगुणं प्रदर्शयन्ति । तथैव अधिकतापे तु अतिवाहकत्वगुणं त्यजन्ति। एतादृशीं द्रव्यरूपान्तरप्रक्रियां एते विज्ञानिनः व्यवृण्वन्। गणितम् उपयुज्य क्रियमाणं द्रव्यगुणाध्ययनं टोपोलजिनाम्ना उच्यते। अस्यां शाखायां एतेषां त्रयाणां विशिष्टा परिणतिरासीत् ।

## पाकिस्तानं प्रति युद्धमेव उत्तरं न

नवदिल्ली–भारत–पाकिस्तानदेशयो–र्मध्ये विद्यमानसमस्यानिवारणाय युद्धमेव न परिहारोपायः इति श्रीलङ्का देशस्य प्रधानमन्त्री रनिलविक्रमसिङ्घे अवोचत्। सः भारतस्य प्रधान–मन्त्रिणा नरेन्द्रमोदिना सह वार्तालापं कृत्वा पश्चात् माध्यमप्रतिनिधीन् प्रति एवमवदत्। ''सार्कसङ्घटनस्य अष्टापि देशाः सीमातः बाहीक–भयोत्पादनस्य तत्परिणामस्य चर्चा कुर्युः। सार्कसङ्टनं शिथिलीभवति चेदपि सीमातः बहिः भयोत्पादनं न स्थग्यते। अतः भयोत्पादननिग्रह–विषये भारतेन चिन्तनीयम्। इस्लामा बादनगरे पूर्वमायोजिता सार्कसभा स्थगिताभूत्। तत्र कारणं परिशील–नीयम्। अन्यथा सार्कसङ्घटनमेव व्यर्थं भविष्यति। सम्प्रति भारत–पाकिस्तानदेशयोर्मध्ये वार्तालापः सम्यक् न प्रचलिष्यति। परम् अनयोर्मध्ये वर्तमानाम् उद्विग्नपरि–स्थितिं निवारयितुं मोदिः नैकोपायान् कृतवान् अस्ति'' इति रनिलविक्रम सिङ्घे अवदत् ।

## रासायनशास्त्रस्य नोबेल्प्रशस्तिः

स्टाकहोम्–अणुचालितयन्त्राणम् अभिवृद्धिं कृतवद्भ्यः त्रिभ्यः विज्ञानिभ्यः ऐषमः रासायनशास्त्रस्य नोबेल्प्रशस्तिः घोषितास्ति। फ्रान्स् देशस्य पिर्सेसुवाजः ब्रिटन्देशस्य फ्रेस्सरस्ट्रूदार्टः नदर्ल्याण्डदेशस्य बर्नार्डफेरिङ्गश्च नोबेल्प्रशस्ति–भाजनाः सन्ति । अणुभिः संरचितानि इमानि यन्त्राणि जगति अत्यल्पगात्राणि सन्ति।'' नियन्त्रित चलनयुतान् अणून् एते त्रयः विज्ञानिनः अभिवर्धितवन्तः। एतानि यन्त्राणि शक्त्या पूरितानि निर्दिष्टकार्यकरणे सक्षमाणि'' इति चयनसमितिसदस्याः अवोचन् ।

## हासानाम्बादर्शनम्

हासन–अत्र नगराधिदेवता हासनाम्बा। अस्य देवालयस्य वैशिष्ट्यं किमिति चेत्, सदा तस्य द्वाराणि पिहितानि भवन्ति। वर्षे केवलम् एकवारं द्वाराणि उद्घाट्यन्ते, तदैव देव्या दर्शनं लभ्यते भक्तैः।